कक्षा : दशमी

संस्कृतम् (कोड संख्या -122)

अङ्कयोजना - 2019-20

समयः – होरात्रयम् **सम्पूर्णाङ्काः – 80**

अवधातव्यम् -

1. अस्याम् अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति । प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति ।
2. **यदि छात्रः सर्वेषां प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः दातुं शक्यन्ते तादृशानां प्रश्नानां मूल्याङ्कनं करणीयम् ।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम् ।
3. अनुच्छेदे श्लोके वा आधारिताः प्रश्नाः अवबोधात्मकाः सन्ति । अतः विद्यार्थिनः अनुच्छेदे प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाची-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति । तदर्थम् अङ्काः देयाः । यदि विद्यार्थिनः उत्तरदान-समये समुचितानां विभक्तीनां वचनानां प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः ।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः ।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः ।
6. 'ख' खण्डे (रचनात्मक-कार्ये) वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम् । अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः ।
7. **प्रश्ननिर्माणस्य प्रश्ने ½ अङ्कः वाक्यलेखनाय अस्ति, ½ अङ्कश्च प्रश्नवाचकचिह्नाय। परं सम्यक्-प्रश्ननिर्माणं तदा एव प्रश्नवाचकचिह्नस्य कृते अङ्काः प्रदेयाः ।)**

प्रश्नसङ्ख्या	खण्डः	अङ्काः
	'क' खण्डः **अपठित-अवबोधनम्**	10 **अङ्काः**
1.	**अ एकपदेन उत्तरत –** (i) स्वजीवनम् (ii) हरिश्चन्द्रः (iii) महाराणा प्रतापः / प्रतापः	1×2=2

	ब पूर्णवाक्येन लिखत (i) दृढप्रतिज्ञ-जनानां कृते तेषां व्रतमेव सर्वप्रमुखं भवति। (ii) अद्यापि महापुरुषाणां चरणचिह्नानि मानवान् सत्याचरणं प्रति प्रेरयन्ति । (iii) महाराणा- प्रतापस्य पत्नी पुत्रौ च प्रतापं पराधीनं जीवनं जीवितुम् अकथयन् । **स अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत** महापुरुषाः / दृढप्रतिज्ञाः **द यथानिर्देशम् उत्तरत** (i) (क) महर्षि-दयानन्दः (ii) (ख) नृपः (iii) (ख) भार्याम् (iv) (क) सत्यस्य	2x2 =4 1 1×3=3
	'ख' खण्डः **रचनात्मक-कार्यम्**	15 अङ्काः
2.	2. **पत्र-लेखनम्** (i) देहरादूनतः (ii) नमोनमः (iii) पत्रेण (iv) अभवम् (v) शङ्कुमः (vi) अनेकासु (vii) संस्कृतस्य (viii) ग्रन्थाः (ix) विषयैः (x) मित्रम्	½x10 =5
3.	**चित्रवर्णनम्** अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते । केवलं वाक्यशुद्धिः द्रष्टव्या। अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति। वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति । प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति । छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति । छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवृत्य अपि वाक्यनिर्माणं शक्यते ।	1×5=5

	अथवा **अनुच्छेदलेखनम्** अयं विकल्पः सर्वेभ्यः अस्ति । छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवृत्य अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति । अतः अङ्काः देयाः। अस्मै प्रश्नाय अपि ५ अङ्काः निर्धारिताः सन्ति । प्रत्येकं वाक्यनिमित्तम् अङ्कमेकम् इति।	
4.	**अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत -** 1. माता भोजनं पचति। 2. वयं (सर्वे) संस्कृतं पठामः। 3. श्वः विद्यालयस्य अवकाशः भविष्यति। 4. ह्यः त्वं कुत्र आसीः? 5. यूयं कलमेन लिखत । 6. बालः कुक्कुरात् बिभेति । 7. किम् अहम् अन्तः आगच्छानि / प्रविशानि?	1x5 = 5
	'ग' खण्डः **अनुप्रयुक्त-व्याकरणम्**	25 अङ्काः
5.	**सन्धि / सन्धिच्छेदः** (i) धूमम् मुञ्चति (ii) युवयोर्जननी (iii) गावः + च (iv) भवेद् यदि (v) राज्ञो विरुद्धः **(पूर्णतया अङ्काः न न्यूनीकरणीयाः, अंशतः अङ्काः देयाः।)**	1×4=4
6.	**समासः / विग्रहः** (i) (ग) वाष्पयानानां माला (ii) (ख) वचनं वचनं प्रति (iii) (क) राज्ञः पुत्रः (iv) (ग) व्याघ्रः चित्रकः च (v) (क) निर्गुणः **(अस्मिन् प्रश्ने यदि छात्राः केवलम् उत्तराणि लिखन्ति तदा अपि पूर्णाः अङ्काः देयाः।)**	1x4 = 4

7.	**प्रकृति-प्रत्ययः** (i) (ग) बुद्धिमत् + ङीप् (ii) (क) वत्सल + टाप् (iii) (ख) महत् + त्व (iv) (ग) सहिष्णुता (v) (ग) चक्षुष्मन्तः **(अस्मिन् प्रश्ने यदि छात्राः केवलम् उत्तराणि लिखन्ति तदा अपि पूर्णाः अङ्काः देयाः।)**	1×4=4
8.	**वाच्यपरिवर्तनम् –** (i) त्वम् (ii) दृश्यते (iii) शब्दरूपाणि **(अस्मिन् प्रश्ने यदि छात्राः केवलम् उत्तराणि लिखन्ति तदा अपि पूर्णाः अङ्काः देयाः।)** **अथवा** (क) आज्ञनेयेन गीतं लिख्यते । (ख) अहं कार्याणि करोमि । (ग) युष्माभिः फलानि नीयन्ते । (घ) बालकः दुग्धं पिबति । (ङ) भक्ताभ्यां देवः नम्यते ।	1×3=3
9.	**समयः -** (क) सार्ध-चतुर्वादने (ख) सपाद-षड्वादने (ग) सप्तवादने (घ) सार्ध-सप्तवादने (ङ) पादोन-नववादने	1×4=4
10.	**अव्ययानि-** (क) श्वः (ख) तत्र (ग) वृथा	½x6 =3

	(घ) उच्चैः (ङ) कुतः (च) अधुना (छ) अपि (ज) इतस्ततः	
11.	**अशुद्धि-संशोधनम् -** (क) खादति (ख) पाठयति (ग) उन्नतः (घ) आगमिष्यति	1×3=3
	'घ' खण्डः **पठित-अवबोधनम्**	30 **अङ्काः**
12.	**गद्यांशः** **अ. एकपदेन उत्तरत ।** (क) कृषकः (ख) ऋषभः (ग) कृषीवलः / कृषकः **ब. पूर्णवाक्येन उत्तरत -** (क) सुराधिपः अपृच्छत् –"अयि शुभे ! किमेवं रोदिषि? उच्यताम् इति । (ख) भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन् । **स. भाषिककार्यम् -** (i) (ख) बहुवारम् (ii) (क) सुराधिपः (iii) (ग) दुर्बलम् (iv) (ख) अकरोत्	½×2=1 1×1=1 1×3=3
13.	**पद्यांशः** **अ. एकपदेन उत्तरत -** (i) प्रभूतानि	½×2=1

	(ii) परेभ्यः (iii) अहितं कर्म **ब. पूर्णवाक्येन उत्तरत -** (क) यः आत्मनः श्रेयः प्रभूतानि सुखानि च इच्छति सः परेभ्यः अहितं कर्म न कुर्यात्। (ख) परोपकारेण आत्मनः श्रेयः भवति । **स. निर्देशानुसारम् उत्तरत -** (i) (अ) इच्छति (ii) (ब) कर्म (iii) (अ) श्रेयः (iv) (स) परेभ्यः	1×1=1 1×3=3
14.	**नाट्यांशः** **अ. एकपदेन उत्तरत ।** (क) रे परभृत् ! (ख) काकः (ग) वृक्षोपरि / वृक्षस्य उपरि / वृक्षस्य **ब. पूर्णवाक्येन उत्तरत ।** (क) काकः -"रे परभृत् ! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः "इति वदति । (ख) सिंहः - "भोः गज ! मामप्येवमेवातुदन् एते वानराः" इति वदति । **स. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत -** (i) (क) वानरः (ii) (क) काकः (iii) (ख) बलशाली (iv) (ग) अतुदन्	½×2=1 1×1=1 1×3=3
15.	**प्रश्ननिर्माणम् । (½ अङ्कः वाक्यलेखनाय अस्ति, ½ अङ्कश्च प्रश्नवाचकचिह्नाय ।** **(परं सम्यक्-प्रश्ननिर्माणं भवति <u>तदा एव प्रश्नवाचकचिह्नस्य कृते अङ्काः प्रदेयाः</u>)** **(क)** उद्याने <u>**केषां**</u> कलरवः चेतः प्रसादयति? **(ख)** व्यायामं कुर्वतः <u>**कीदृशं**</u> भोजनम् अपि परिपच्यते? **(ग)** <u>**कः**</u> ताम् अपृच्छत्?	1×4=4

	(घ) सः <u>कया</u> क्रन्दति स्म? (ङ) प्रीताभ्यः प्रकृतिभ्यः <u>के</u> प्रति प्रियमिच्छन्ति?	
16.	**मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत -** I. **अन्वयः-** (i) नित्यम् (ii) कुर्वतः (iii) विदग्धम् (iv) भोजनम् II. **अन्वयः** – (i) मनुष्याणाम् (ii) महान् (iii) उद्यमसमः (iv) कृत्वा **अथवा** **मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -** **भावार्थः** – गुणवान् जनः एव **<u>गुणानां</u>** महत्त्वं जानाति । गुणहीनः गुणानां महत्त्वं न अवगच्छति । तथैव **<u>बलवान्</u>** जनः बलस्य महत्त्वं जानाति परन्तु दुर्बलः बलस्य महत्त्वं न अवगच्छति । वसन्त-ऋतोः महत्त्वं कोकिलः एव सम्यग् **<u>अवगन्तुं</u>** शक्नोति न तु काकः । एवमेव गजः सिंहस्य **<u>पराक्रमस्य</u>** महत्त्वं जानाति । मूषकः तस्य शौर्यम् अवगन्तुं न शक्नोति ।	½ ×4=2 ½ ×4=2 4
17.	**अधोलिखित-कथांशं समुचित-क्रमेण लिखत -** 1. बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता। 2. मार्गे सा एकं व्याघ्रम् अपश्यत्। 3. व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच – अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्। 4. व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः। 5. जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्। 6. प्रत्युत्पन्नमतिः सा शृगालम् आक्षिपन्ती उवाच। 7. 'त्वं व्याघ्रत्रयम् आनेतुं' प्रतिज्ञाय एकमेव आनीतवान्। 8. गलबद्धशृगालकः व्याघ्रः पुनः पलायितः।	½x8=4

18.	**'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति।** **तानि यथासमक्षं लिखत- (केवलं प्रश्नत्रयम्)** **क** **ख** हिमकरः शशिः सम्प्रति अधुना तनयः पुत्रः पशुपतिः शिवः **अथवा** **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत -** **(केवलं प्रश्नत्रयम्)** 1. एकान्ते <u>कान्तारे</u> क्षणमपि सञ्चरणं स्यात् । (क) वने 2. दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं <u>मृजा</u> । (ख) स्वच्छता 3. <u>वयसस्तु</u> किञ्चिदन्तरम् । (ग) आयुषः 4. यः इच्छत्यात्मनः श्रेयः <u>प्रभूतानि</u> सुखानि च । (क) बहूनि	1×3=3 1×3=3

--000--------0000----------000000----------0000------000--